CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

चौखम्भा राजसेवा ग्रन्थमाला ४७

सत्यस्वरूप-मिश्र-विरचितः

श्रीहनुमत्सहस्रनामस्तवः

चौखम्भा ओरियन्टालिया

वाराणसी दिल्ली

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ श्रीः ॥

चौखम्भा राजसेवा ग्रन्थमाला

४७

सत्यस्वरूप-मिश्र-विरचितः

श्रीहनुमत्सहस्रनामस्तवः

चौखम्भा ओरियन्टालिया

वाराणसी दिल्ली

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रकाशक

चौखम्भा ओरियन्टालिया

पो० आ० चौखम्भा, पो० बाक्स नं० ३२

गोकुल भवन, के० ३७/१०९, गोपाल मन्दिर लेन

वाराणसी–२२१००१ (भारत)

टेलीफोन : ६५८८९ टेलीग्राम : गोकुलोत्सव

शाखा—बंगलो रोड, ९ यू० बी० जवाहर नगर

दिल्ली–११०००७ फोन : २२१६१७

© डॉ० सत्यस्वरूप मिश्र

प्रथम संस्करण १९८०

मूल्य रु० ~~[illegible]~~ ८/-

मुद्रक–श्रीगोकुल मुद्रणालय, गोपाल मन्दिर लेन, वाराणसी

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आचार्य-बलदेव-उपाध्यायस्य

करकमलेषु सादरम्

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तस्मै निवेदनम्

कृपापारावारस्फुरितमिदमेवामृतकणम्
कृपाम्भोधेः पादाम्बुरुहयजनार्थं विलिखितम् ।
न लेखार्थं ज्ञानं न च कविकृतौ दक्षहृदयम्
तदिच्छाजातोऽहं प्रकृतिपुरुषो लेखनकरः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ॐ

सत्यस्वरूप-मिश्र-विरचितः

श्रीहनुमत्सहस्रनामस्तवः

अर्जुन उवाच

कृष्ण कृष्ण महाबाहो मम दर्पनिसूदन ।
ब्रूहि मे हनुमन्नामसहस्रं करुणामय ॥ १ ॥
प्रसन्नं तं करिष्यामि वायुसुतं महाबलम् ।
अपराधं कृतं यस्मान्महिमानमजानता ॥ २ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रीकृष्ण उवाच

शृणु पार्थवदिष्यामि हनुमन्नाममालिकाम् ।
सहस्रसंख्यकं मात्रं हनुमत्प्रीतिकारकम् ॥ ३ ॥
ॐ हनुमान्वायुपुत्रश्चाञ्जनापुत्रो महाबलः ।
अञ्जनानन्दनो वायुनन्दनः सर्ववन्दनः ॥ ४ ॥
रामभक्तो रामनामी रामरामेतिघोषकः ।
सीतारामाश्रयो रामप्रियः श्रीलक्ष्मणप्रियः ॥ ५ ॥
रामदासो रामबन्धू रामात्मा राममानसः ।
रामपदरजःप्रार्थी लक्ष्मणप्राणदायकः ॥ ६ ॥
किष्किन्ध्यास्थो लङ्कापुरीदाहनो राक्षसान्तकः ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वेदज्ञो देवकार्यज्ञः सर्वज्ञः सर्वदर्शनः ॥ ७ ॥
कपीन्द्रः कपिबन्धुश्च कपीन्द्रबान्धवः कपिः ।
कपीशः कपिशः कोपी शान्तः शन्तमकः सुरः ॥ ८ ॥
रामाश्रयो दर्पहीनः समुद्रलङ्घनः पविः ।
रक्तवर्णप्रियो रक्षःकुलघ्नो राक्षसान्तकृत् ॥ ९ ॥
रावणदर्पदलनश्चक्रगर्वनिसूदनः ।
तार्क्ष्यगर्वहरो भीमगर्वहा गर्ववारणः ॥ १० ॥
मरुत्पुत्रो वज्रदेहो गन्धमार्दनधारणः ।
आञ्जनेयो मरुत्सुतो मारुतिः सूर्यग्रासनः ॥ ११ ॥
आशुवरप्रदो भीतिहरो सङ्कटमोचनः ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सीताश्वस्ता रामदूतो जानकीसुखवर्धनः ॥ १२ ॥
वायुजो वातजो भीमो भीमाग्रजोऽतिभीषणः ।
विभीषणसखो भीमकान्तो रविप्रियः शुभः ॥ १३ ॥
शिवांशः शिवकृत् सेवी रामसेवी सुसेवकः ।
रौद्रो रुद्रांशो रुद्राभो रुद्रोपम उदारधीः ॥ १४ ॥
दैत्यवारो दनुजहा रक्षोघ्नो दैत्यवारणः ।
दर्पकदर्पहाऽदर्पो दर्पकतातसेवकः ॥ १५ ॥
दैत्यहा दानवेन्द्रारिस्ताक्ष्यबन्धुः शुभङ्करः ।
भूजभुजो[1] भूजङ्गारिदर्पहृज्जनरञ्जनः ॥ १६ ॥

१. भूजः पर्वतो भुजे हस्ते यस्य सः ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ज्वलज्ज्वलनवर्णाभो लङ्काज्वलनतत्परः ।
ज्वलत्पुच्छो वह्निरूपो वह्निमित्रसुतोऽग्निभः ॥ १७ ॥
समीरजी वानरेशः समीरणसुतोऽद्रिभृत् ।
प्रभञ्जनसुतः कञ्जलोचनचरणाश्रितः ॥ १८ ॥
अनलाभो बृहद्वपुर्नीलसखोऽनिलात्मजः ।
रामनामगुरुः रामनाममहिमवर्धनः ॥ १९ ॥
गिरिहस्तो गिरीन्द्रभृद् भूजभृत्सूक्ष्मरूपभृत् ।
लङ्केशदर्पहृत्स्वर्णलङ्कापुरीविनाशकृत् ॥ २० ॥
मारुतिर्वायवो वीरो महावीरोऽञ्जनासुतः ।
ब्रह्ममयो ब्रह्मचारी ब्रह्मज्ञो ब्रह्मसेवकः ॥ २१ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पिशाचमोचनो भूतभोक्ता राक्षसमारणः ।
अकुपारपारगामी सङ्क्रामी सर्वतारणः ॥ २२ ॥
देवारिदलनो देवारिहा देवगणप्रियः ।
वेदज्ञो रामतत्वज्ञो रामायणप्रियः सुधीः ॥ २३ ॥
मरुज्जः पार्थबन्धुश्च भीमशक्तिप्रदायकः ।
रामकार्यप्रियः शाखामृगः कृष्णप्रियोऽर्कभृत् ॥ २४ ॥
मर्कटोऽर्कप्रभो बालभानुवर्णो महामदः ।
सानुमान्धारणो दीप्तकृशानुप्रतिमच्छविः ॥ २५ ॥
दग्धपुच्छः पुच्छदग्धलङ्कानगरकोऽतिराट् ।
वज्राङ्गोऽसुरहा वज्रशरीरो वज्रवारणः ॥ २६ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

महाकायो महापुच्छो महीरावणमारणः ।
इन्द्रजित्क्रतुनाशश्च रामलक्ष्मणवाहकः ॥ २७ ॥
सौमित्रिप्राणदो दाशरथिप्रियः प्रियङ्करः ।
अर्जुनरथसंस्थश्च सुपर्णदर्पनाशनः ॥ २८ ॥
भूध्रधरोऽद्रिधो गन्धमार्दनाद्रिकराङ्गुलिः ।
गदाभृद्भूध्रभृन्मर्कभूभृत्कक्षार्कभृत्[२]सुभृत् ॥ २९ ॥
विभीषणबन्धुर्भीमरूपो रक्षःकुलापहा ।
राघवप्रीर्लक्ष्मणप्रीर्भरतप्रीर्महाकपिः ॥ ३० ॥

१. मर्को मर्कटस्तेषां भूभृद्राजा ।
२. कक्षेऽर्क विभर्तीति ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कपिराड् मर्कराट् स्तुत्यो रामभृत्यो वनप्रियः ।
वनेचरोऽरण्यचरो निशाचरविनाशकः ॥ ३१ ॥
चिरञ्जीवो मृत्युञ्जयी जीवनमृत्युपारगः ।
मृत्युहरः सदाजीवो महाजीवः सनातनः ॥ ३२ ॥
रुद्ररूपी महारुद्रो रुद्रोपमः शिवोपमः ।
जीवन्मुक्तो मोहमुक्तो मुक्तिप्रदस्सुमोक्षदः ॥ ३३ ॥
रामध्यायी रामध्याता रामपदैकसंश्रयः ।
एकभक्तिर्भक्तशक्तिर्भक्तराड्भक्तबान्धवः ॥ ३४ ॥
शोकहीनोऽशोकवनभञ्जनो गर्वभञ्जनः ।
रामार्तिभञ्जनो रामसेवकार्तिविभञ्जनः ॥ ३५ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

रामसंवादवाहश्च सीताश्वस्तिविधायकः ।
देवारिदर्पदलनो दानवारिर्दयाकरः ॥ ३६ ॥
कृपासिन्धुर्दीनबन्धुर्भगवत्कार्यसाधकः ।
शक्तिमान् भक्तिमान् रक्तचन्दनाक्तकलेवरः ॥ ३७ ॥
पावनः पावकाभास्यः पवित्रकृद्वपुर्पविः ।
आनन्ददो नामानन्दः सदानन्दश्च कीर्त्तिदः ॥ ३८ ॥
नाममत्तो नामलीनो रामलीनो वियद्गतिः ।
लङ्कादग्धा लङ्कादाही विघ्नहा विघ्नवारणः ॥ ३९ ॥
वैश्वानरो वैश्वानरप्रभो विश्वजनार्तिहृत् ।
विश्ववन्द्यो निःस्ववन्द्यो विश्वनिःस्वकृतार्थकृत् ॥ ४० ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दाशरथिनमस्कारी दाशरथिप्रणामकृत् ।
राघवस्तुद् हृदिसीतारामनिवासकारकः ॥ ४१ ॥
रामप्रणामको रामनामकृद् रामकर्मकृत् ।
रामसेवावतारश्च मूर्तिमान्सेवकोत्तमः ॥ ४२ ॥
रामकीर्त्तिप्रसारी च राघवकीर्त्तिगायकः ।
स्नेहबद्धः कुशलवे रवैः राक्षसनाशकः ॥ ४३ ॥
भीमवपुर्महाकीर्त्तिर्कीर्त्तिदः कीर्त्तिसागरः ।
सागरलङ्घनः सेतुबन्धकृत्सेतुकारकः ॥ ४४ ॥
निष्कामः कामदः काम्यः कर्मवीरोऽसुरान्तकः ।
सुरारिरिपुर्देवारिरिपुर्वानररूपधृत् ॥ ४५ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नमस्यः प्रणतार्तिहृद् दयालुकरुणाकरः ।
महाकृपोऽनन्तकृपः कृपोदधिः कृपाकरः ॥ ४६ ॥
भूजराजभूजो भज्यो भूजभृद् भूजधारणः ।
भूजभृत्सेवको भूजापतिभृत्यो महाभुजः ॥ ४७ ॥
भूजेशभजनो भूजार्तिहा भूजासुतोपमः ।
भूजेशसेवको भूजानाथपादरजःप्रियः ॥ ४८ ॥
भूजापदरजःपार्थी भूजानाथसुसेवकः ।
भूजाकान्तप्रियो भूजापाणिभृत्पादधारकः ॥ ४९ ॥
इन्द्रजिद्यज्ञनाशी च वानरेन्द्रो जितेन्द्रियः ।
मर्कटेन्द्रो महामर्को मर्कराड्दुःखवारणः ॥ ५० ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

निःस्वार्थसेवको निजस्वार्थहीनः परोपकृत् ।
सर्वार्थसिद्धिदः सिद्धः साधुः साधुजनार्तिहा ॥ ५१ ॥
देवकार्यव्रती गन्धमार्दनाद्रिकराश्रयः ।
निर्गुणो भगवद्भक्तो भगवान्भक्तरूपकः ॥ ५२ ॥
देवारिकार्यहा रक्षोविघ्नकृत्सर्वदुःखहृत् ।
देवदेवांशो देवेड्यः पार्थरथशिरोरुहः ॥ ५३ ॥
सीतारामभक्तः सीतारामप्रियः कृतप्रियः ।
रमेशपूजको रामपूजकोः कृष्णपूजकः ॥ ५४ ॥
हरिभक्तः हरिप्रियः हरिसेवी सदाव्रतः ।
अक्लान्तः कर्मयोगी च भक्तिबीजश्च भक्तिकृत् ॥ ५५ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अनन्यनिष्ठोऽनन्तधीर्महाधीरुदधिन्तरः ।
समुद्रलङ्घनो वायुबालोऽञ्जनासुतोऽभयः ॥ ५६ ॥
अभयद औषधिदः प्राणदः सुखदः सुदः ।
श्रीदो धीदो भीहृच्छ्रीभृच्छिवदो मानवार्तिहृत् ॥ ५७ ॥
नारायणपुरोगामी लक्ष्मीपुत्रो वरप्रदः ।
देवपूज्यो महापूज्यो बालकार्तिनिवारणः ॥ ५८ ॥
सदानामरतः सदारामसेवारतोऽग्रगः ।
कर्मप्रेमी नामप्रेमी यशस्वी सुयशःप्रदः ॥ ५९ ॥
कुम्भकर्णरिपुः भूभृद्धस्तो महामहीध्रहृत् ।
महावपुः महामनाः महाचित्तो महाकृतिः ॥ ६० ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

महावेगस्तीरवेगो वायुवेगोऽतिवेगगः ।
वेगवान् वेगगो विज्ञो मनोवेगो मनोमयः ॥ ६१ ॥

कुध्रधरः कुकर्महृत् पापनाशी शुभद्युतिः ।
शुभदः शान्तिदः प्रीदः प्रेमदो भक्तिदोऽर्चितः ॥ ६२ ॥

कुध्रकरो भूभृत्करो गदाधरो गदाकरः ।
रामपादधरः पापहरः पुण्यकरः वरः ॥ ६३ ॥

कुध्रभृत्खचरोऽर्काभो भूभृद्धरो बलोदधिः ।
सिन्धुतरो नभश्चारी वायुवेगगतिरुभः[1] ॥ ६४ ॥

१. उभः शिवोपमः ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सूर्याभः शशिशीतलो वायुगतिर्मरुद्गतिः ।
वातात्मज इन्द्रसमः इन्द्रारिहाऽमरप्रियः ॥ ६५ ॥
योगेशो योगयुक्तश्च महायोगी वियच्चरः ।
अल्पकायो महाकायो विश्वकायस्सुकायकः ॥ ६६ ॥
वेदवेदान्तवेत्ता च कर्मवीरो महारवः ।
हुङ्कारनष्टदैत्यश्च रघुनायकसेवकः ॥ ६७ ॥
राघवपदसेवाकृद्रावणारिपदाश्रयः ।
रामपादकजध्यायी रामकञ्जपदाश्रयः ॥ ६८ ॥
रामार्पितयोगक्षेमो रामार्पितशुभाशुभः ।
निर्द्वन्द्वो नित्यसत्वस्थः समदुःखसुखः क्षमी ॥ ६९ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आत्मारामो मुनिः शास्ता सर्वदुःखनिवारकः ।
किरीटी हारभृत्सौम्यो रत्नकुण्डलमण्डितः ॥ ७० ॥
दैत्यकुलमहावज्रो दैत्यारिपदसेवकः ।
दैत्येन्द्रवंशनाशी च दूतेन्द्रो रामदूतकः ॥ ७१ ॥
रामकार्यावतारश्च रामानन्दकरोऽर्थदः ।
सूर्यप्रभः सूर्यवंशप्रभवारिनिवारकः ॥ ७२ ॥
रामनामरसास्वादी रामनाममधुप्रियः ।
रामनामसुधामत्तो रामनामामृताश्रयः ॥ ७३ ॥
ब्रह्मचारिवरो ब्रह्ममयो ब्रह्मस्वरूपकः ।
स्वभावब्रह्मचारी च दाशरथिप्रपूजकः ॥ ७४ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कौशल्यानन्दनानन्दो दशरथसुताश्रितः ।
दशरथसुतानन्दः कौशल्यानन्दनाश्रितः ॥ ७५ ॥

प्रभुभक्तः प्रभारक्तः सिन्दुरारुक्तकलेवरः ।
प्रवालाभो बालार्काभो बालो बालिबलापहः ॥ ७६ ॥

रामपदरजोलुब्धः सीतापदरजोग्रहः ।
रामसीतापदरजोग्रहणाय समुत्सुकः ॥ ७७ ॥

रामायणपाठश्रवा रामायणश्रुतिप्रियः ।
रामायणमहाग्रन्थश्रवणाय समुत्सुकः ॥ ७८ ॥

रामात्मा रामसर्वस्वो रामार्पितकलेवरः ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

रामगो[1] रामनामगो[2] रामरामेतिगायकः ॥ ७९ ॥
रामायणमहाश्रोता रामनामसुगायकः ।
रामनाममहावक्ता रघुनायकवाहकः ॥ ८० ॥
नारायणसखो नारायणभृत्यो नरार्चितः ।
पुष्टदेहो लम्बितौष्ठः कदलीभोजनप्रियः ॥ ८१ ॥
मर्कवरो मखध्वंसी इन्द्रजिद्यागनाशनः ।
रक्तकमलवर्णाभो वह्निवर्णो महाग्निकः ॥ ८२ ॥
आर्तत्राणार्तिहारी च परित्राणपरायणः ।

१. रामगो रामगायकः ।
२. रामनामगो रामनामगायकः ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जगन्नायकरक्षी च जगन्नाथस्य सेवकः ॥ ८३ ॥

विश्वनाथांशावतारो रक्षोघ्नो रुद्ररूपभृत् ।
दैत्यघ्नो दानवेन्द्रघ्नो देवारिघ्नोऽसुरान्तकः ॥ ८४ ॥

विघ्नघ्नः सर्वदुःखघ्नो दनुजघ्नोऽब्धिपारगः ।
रक्षोनाशो दुःखनाशो भक्तदुःखविनाशनः ॥ ८५ ॥

अञ्जनाजो वातशिशुर्वायुसूनुर्समीरजः ।
समीरणसुतः प्रभञ्जनपुत्रोऽर्कगञ्जनः ॥ ८६ ॥

रामार्पितमनोबुद्धिः रामार्पितशरीरकः ।
रामापादार्पितशिरो रामाय सततन्नतः ॥ ८७ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नवदूर्वादलश्यामध्याता दूर्वादलप्रियः ।
आधिहर्ता व्याधिहर्ता शुभकर्त्ता जयङ्करः ॥ ८८ ॥
जयकर्त्ता भयहर्त्ता लयदाता शुभप्रदः ।
जराव्याधिदुःखहर्त्ता जानकीभर्तृसेवकः ॥ ८९ ॥
सीतेशदासः सीतेशभृत्यः सीतेश्वरार्चकः ।
सीतेशचरणाश्रयः सीतेश्वरपदाश्रयः ॥ ९० ॥
जनकनन्दिनीप्राणेश्वरपादकजाश्रयः ।
जानकीशपदाश्रितः सीतेशचरणाश्रितः ॥ ९१ ॥
भक्तितुष्टः पत्रपुष्पफलतुष्टोऽतिसुन्दरः ।
पुष्पमालासुशोभितः सिन्दुराक्तशरीरकः ॥ ९२ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दूततमो महादूतो द्रुतगो द्रुतगन्तमः ।
सीताप्राणेश्वरदूतः सीतान्वेषणतत्परः ॥ ९३ ॥
मर्केशो मर्कभूषणो मर्कटकुलभूषणः ।
वानरराजबान्धवो वानररूपपूजितः ॥ ९४ ॥
शस्त्रज्ञः सर्वशास्त्रज्ञो रामज्ञो ज्ञानवत्तमः ।
शस्त्रवेत्ता शास्त्रवेत्ता रामवेत्ता च तत्ववित् ॥ ९५ ॥
रामकीर्तिकरो रामनामकीर्तनकारकः ।
कीर्तनेशो कीर्तनकृत् कीर्तनानन्ददायकः ॥ ९६ ॥
कीर्तिराजः कीर्तिस्पृहाविहीनः कीर्तनाकरः ।
रामकीर्तनकृत् कीर्तिचन्द्रः कीर्तनजीवनः ॥ ९७ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

रामकीर्तिवहो रामचन्द्रपादनिषेवनः ।
रामचन्द्रमुखध्याता रामधामनिवासनः ॥ ९८ ॥
रामवार्ताहरः सीतावार्तानयनकारकः ।
निष्कामसेवावृत्तिध्रः सेवामूर्तिधरो हरः ॥ ९९ ॥
जनकल्याणकारी च मनुष्यहितकारकः ।
पापनाशी धर्मवृद्धो धर्मस्थापनकारकः ॥ १०० ॥
निर्भयो भयनाशी च रामभक्तिप्रदायकः ।
भवभयविनाशी च भवावताररूपकः ॥ १०१ ॥
भगवद्दासरूपश्च ईश्वरांशस्वरूपकः ।
भगवदात्मरूपश्च रामतल्लीनमानसः ॥ १०२ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ईशः ईशांशो विश्वेशो विश्वेशांशो भयङ्करः ।
विश्वेश्वरांशो विश्वत्रो विशेषांशो विशेषकः ॥ १०३ ॥
शेषेशसेवी सेवेशः सुवेषी विश्वमोहनः ।
सर्वमोहहरो हारी हरांशो हरजिद्धरः ॥ १०४ ॥
विशेषो विशेषबन्धुः विशेषेशसुवाहनः ।
विगर्वहा विदर्पहा गरुत्मद्गर्ववारणः ॥ १०५ ॥
हनुमान् सानुमद्धारी धीमान् निष्कामभाववान् ।
भक्तसहायको भक्तिवर्धको भक्ततारकः ॥ १०६ ॥
मङ्गलो मङ्गलमूर्तिः पावनः पावनात्मभूः ।
पवनतनयः पूतः पूतात्माऽपूतपावनः ॥ १०७ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

सीतासुतः सीतारामसुतः सुभक्तिदायकः ।
भगवद्भक्तिदो रामभक्तिदो रामप्रीतिदः ॥ १०८ ॥
भक्तिमान् भक्तिदो भक्तिपराकाष्ठाप्रदर्शकः ।
महाभक्तिप्रदो भक्तियोगी भक्तिपुरोहितः ॥ १०९ ॥
सद्रूपः सत्यरूपश्च चिद्रूपः चित्स्वरूपकः ।
आनन्दमयः आनन्दरूपः आनन्ददायकः ॥ ११० ॥
सर्वानन्दप्रदः सर्वजीवानन्दप्रदो जवी ।
वायुजवो वातगतिः समीरणसमानगः ॥ १११ ॥
वायुभूर्वातभूः शम्भूः स्वयम्भूः सर्वभूः प्रभुः ।
विश्वभूर्दैवभूः खेभूः प्रवातभूः समीरभूः ॥ ११२ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अभूर्भवबन्धनमुक् फलभुग्वायुसेवकः ।
जगद्बन्धुर्जगद्बन्धुसेवको विश्वपालकः ॥ ११३ ॥
रघुनन्दनभृत्यश्च राघवसेवकोऽमलः ।
रघुनन्दनदासश्च जानकीसेवकोऽमरः ॥ ११४ ॥
सङ्कटहरणः सर्वसङ्कटहृत्सदाशिवः ।
मङ्गलायतनो रुद्रतनुःशिवतनुःश्रमी ॥ ११५ ॥
हरेकृष्ण-हरेराम-हरेकृष्णेतिघोषकः ।
हरेराम-हरेकृष्ण-हरेरामेतिघोषकः ॥ ११६ ॥
हरिभृत्यो हरिदासो हरिर्हरिसखोऽरिहा ।
हारी हरिहरानन्दो नन्दनन्दननन्दनः ॥ ११७ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

किरीटी कुण्डली रत्नी पुष्पमालाविभूषितः ।
श्रीवासदासः श्रीनाथवार्ताहारी श्रियःसुतः ॥ ११८ ॥
हररूपी हरिकार्यकारको दुःखहारकः ।
राक्षसमारकः सिन्धुपारकः सिन्धुपारगः ॥ ११९ ॥
समुद्रलङ्घनोऽर्णवलङ्घनोऽर्णवपारगः ।
सागरलङ्घनः सिन्धुलङ्घनोऽम्बुधिलङ्घनः ॥ १२० ॥
वीरेन्द्रो वीरश्रेष्ठश्च महावीरः सुवीरकः ।
वीरवारणो वीरेशो वीरहा वीरसत्तमः ॥ १२१ ॥
रक्षोहा भूतहा दैत्यमारणो दैत्यहाऽभिहा ।
दानवहा दितिपुत्रमारणः पुच्छदाहनः ॥ १२२ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दुःखनाशोऽमङ्गलहृत्पीडानाशो ह्यनिष्टहृत् ।
अशोकवनगन्ता च सीतासंवादहारकः ॥ १२३ ॥
जन्मजन्मान्तरपापनाशनस्तापहारणः ।
सर्वचरः सीताचौरमुखेचपेटचालनः ॥ १२४ ॥
खचरो भूचरः सत्यपालकपदसेवकः ।
विश्वगः सर्वगः स्थायी चिरस्थायी स्थिरो दृढः ॥ १२५ ॥
चरोऽचरश्चराचरश्चराचरचराश्चिरः ।
चर्चितश्चर्चकोऽर्चिष्मान् रामपूजाकरोऽर्चकः ॥ १२६ ॥
लङ्काकालो वह्निदीप्तो लङ्कानलोऽनिलात्मजः ।
महाकालो महाबालः करालः कालकारकः ॥ १२७ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जेता जयप्रदो जम्भनिषूदनाङ्घ्रिपूजकः ।
कालजेता भवदुःखहरो भवभयंहरः ॥ १२८ ॥
कर्मी कर्मकरः कामहीनः कामतताश्रयः ।
रामकर्मकरो रामपादपद्ममधुव्रतः ॥ १२९ ॥
इच्छागतिः मनोवेगः वायुवाहः मरुद्गतिः ।
मरुत्पुत्रो मरुज्जातो मरुज्जो मरुतांसुतः ॥ १३० ॥
मरुत्सुतो मरुत्सूनुः मरुत्तनुजः आञ्जनिः ।
मारुतो मारुतपुत्रो नभस्वज्जः समीरजः ॥ १३१ ॥
मातरिश्वसुतो गन्धवहपुत्रश्च मारुतिः ।
मातरिश्वपुत्रः समीरणपुत्रोऽनिलात्मजः ॥ १३२ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्राणदः प्राणजः शीघ्रगतिः शीघ्रगमात्मजः ।
आशुग आशुगसुत आशुगतिश्च तूर्णगः ॥ १३३ ॥
अतिशीघ्रगतिः श्वासस्नुनुः विश्वासभाजनः ।
कामगतिः कामरूपी जगत्प्राणसुतोऽतिगः ॥ १३४ ॥
श्वसनजः स्पर्शनजः सर्वदागतिजोऽग्रगः ।
रक्षोरिपुः राक्षसहा कौणपहाऽऽशरोरिपुः ॥ १३५ ॥
पुण्यात्मा पुण्यजनहा रक्षोहा रक्षकोऽप्सुगः ।
पृषदश्वसुतः पवमानपुत्रो बृहत्कपिः ॥ १३६ ॥
निशाकरप्रभो निशाचरहा यातुधानहा ।
कर्बुरहा नैकषहा निकषात्मजहाऽमृतः ॥ १३७ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यातुहाऽस्त्रपहा क्रव्यान्मारणोऽस्त्रपमारणः ।
आशरहा निकषात्मजमारो नैकषान्तकः ॥ १३८ ॥
नैकषघ्नो वैश्रवणमारणो निकषाजहा ।
कीशः कीशेशः प्लवगः प्लवङ्गमः द्रुतङ्गमः ॥ १३९ ॥
अरण्यौकाः वनौकाः किः वानरेश्वरवान्धवः ।
ऋक्षबन्धुः ऋक्षराजबन्धुः भल्लुकवान्धवः ॥ १४० ॥
शाखामृगेशः सर्वेड्यः प्लवङ्गमेश आञ्जनः ।
दैत्यान्तकः प्रेमरङ्को भक्तिशङ्को निशङ्कधीः ॥ १४१ ॥
विभीषणसखो दशमुखरिपुर्वलीमुखः ।
कुम्भकर्णरिपुर्मेघनादशत्रुःशिवञ्जयः ॥ १४२ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रभञ्जनात्मभूर्वातनन्दनः पवमानजः ।
वातापत्यं वायुतोकं सामीरः समरञ्जयः ॥ १४३ ॥
मनोभवजयी मनोगतिशीलः सुमानसः ।
आत्मनिरामद्रष्टा च दाशरथिपदार्चकः ॥ १४४ ॥
रामचरणवासी च रामनामसदाश्रयः ।
रामधीः श्रीरामध्यायी रामध्यानपरायणः ॥ १४५ ॥
हरिः[१] हरिहरिः[२] हरिभक्तो हरिप्रभो[३] हरिः[४] ।
हरिदासो हरिभासो[५] हरिजिज्जित्[६] हरीश्वरः[७] ॥ १४६ ॥

१. कपिः । २. कपिसिंहः । ३. सूर्यप्रभः । ४. कपिशवर्णः ।
५. चन्द्रभासः । ६. इन्द्रजिज्जित् । ७. वानरेश्वरः ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दैत्यारातिः शौरिभक्तः श्रीशभक्तोऽमरार्चितः ।
रावणारातिः दैत्येन्द्रारातिः इन्द्रजयञ्जयः ॥ १४७ ॥

जयः जयकरः जेता जयकर्ता जयप्रदः ।
अजेयः ह्यपराजेयो भक्तिज्ञेयो जनप्रियः ॥ १४८ ॥

जयेशो जयदानकृत् जयशब्दपरिवृतः ।
जराहरो व्याधिहरः सर्वदुःखहरो हरः ॥ १४९ ॥

हरिसेवी हरिवर्णो हरीशो हरिसुप्रियः ।
हरिजिज्जेता सप्ताश्ववर्णः[1] शुभ्रांशुसन्निभः ॥ १५० ॥

---

१. रविवर्णः ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सितांशुप्रभः सीतेशपुत्रः सीतापुरस्कृतः ।
सीतादत्तमणिच्छेत्ता रक्षोकुलविनाशकः ॥ १५१ ॥
प्लवङ्गमगतिः प्लवङ्गमनाथः प्लुतेश्वरः ।
प्लुतिशः प्लुतिगेशश्च प्लवगेशो महाप्लवः ॥ १५२ ॥
अम्भोनिधिपारगामी ह्यम्बुदवाहनोऽम्बुरुट् ।
देवश्रेष्ठः सुरराजवन्दितो देववन्दितः ॥ १५३ ॥
भक्तिसिन्धुपारगामी भक्तिमूर्तिः भवप्रियः ।
भावमयो भक्तिरूपः सेवामूर्तिः सुसेवकः ॥ १५४ ॥
रामसभासदो विष्णुपार्श्वदः कृष्णसेवकः ।
दामोदरपदाश्रयो वैकुण्ठचरणाश्रयः ॥ १५५ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सुग्रीवार्तिहरः सुग्रीवबन्धुः सुग्रीवारिहा ।
वालिघ्नो रामशत्रुघ्नः शत्रुघ्नः शत्रुनाशनः ॥ १५६ ॥
देवकार्यकरो देवहितकृद्देवकार्यकृत् ।
गदाभृत् सुगदाधारी पर्वतभृन्महाद्रिभृत् ॥ १५७ ॥

महाद्रिभृदिति महाद्रिभृत् ।

इति नामसहस्रञ्च हनुमत्प्रीतिकारकम् ।
रामभक्तप्रीतिहेतोः श्रीविष्णोः प्रीतिसाधकम् ॥ १५८ ॥
रुद्ररूपांशो हनुमान् तस्य भक्तस्वरूपकः ।
अतः शिवप्रीतिकरा हनुमन्नाममालिका ॥ १५९ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सर्वदेवप्रीतिकरो हनुमान् भक्त ईश्वरः ।
हनुमन्नाममाला च सर्वदेवप्रियङ्करी ॥ १६० ॥
नामसहस्रपाठेन हनुमतिमतिर्भवेत् ।
भक्तिं हनुमति प्राप्य सर्वसिद्धिमवाप्नुयात् ॥ १६१ ॥

इति श्रीसत्यस्वरूपमिश्रकृते पार्थश्रीकृष्णसंवादे
श्रीहनुमत्सहस्रनामस्तवः समाप्तः ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्तोत्र-ग्रन्थाः

१ सौन्दर्यलहरी । श्रीमच्छङ्करभगवत्पादविरचिता ०–७५

२ गङ्गालहरी । श्रीपण्डितराजजगन्नाथ विरचिता । अमृतलहरी, गङ्गाष्टकम् सहित ०–५०

३ महालक्ष्मीस्तोत्रम् । श्रीअगस्ति विरचितम् । विविध छन्दों में महालक्ष्मी के नव स्तोत्रों सहित ०–७५

४ सिद्धसरस्वतीस्तोत्रम् । श्रीब्रह्मा विरचितम् । विविध छन्दों में सरस्वती के दस स्तोत्रों का संग्रह ०–७५

५ अन्नपूर्णास्तोत्रम् । श्रीशंकराचार्य विरचितम् । लक्ष्मीलहरी तथा सङ्कटाष्टकम् सहित ०–५०

६ सन्तानगोपालस्तोत्रम् । लक्ष्मीकेशव-सम्वादे श्री वासुदेव प्रोक्तम् । श्रीकृष्णाष्टकम् सहित ०–५०

७ अपराजितास्तोत्रम् । श्रीमार्कण्डेय मुनि विरचितम् ०-४०

८ श्रीसूक्तम् । (लक्ष्मीसूक्त सहित) ०–४०

९ ललितासहस्रनामस्तोत्रम् (नामावलिसहितम्)। श्रीब्रह्मपुराणान्तरगतम् १–५०

प्राप्तिस्थान—चौखम्भा ओरियन्टालिया, वाराणसी, दिल्ली

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

त्रैलोक्यमङ्गलं सूर्यकवचम् (सूर्यस्तोत्रावली)

सूर्यप्रातःस्मरणस्तोत्रम् । श्रीसूर्यमण्डलाष्टकम्-आदित्यहृदयोक्तम् । सूर्याष्टकम्-शिवप्रोक्तम् । सूर्यकवचस्तोत्रम्-याज्ञवल्क्यविरचितम् । सूर्याष्टोत्तरशतनामस्तोत्रम्-महाभारतेवैशम्पायनोक्तम् । सूर्यस्तवराजः-वशिष्टप्रणीतम् । सूर्यार्यास्तोत्रम्-याज्ञवल्क्यविरचितम् । सूर्यस्तोत्रम् । सूर्यस्तोत्रम्-याज्ञवल्क्यविरचितम् । सूर्याथर्वशीर्षम्-अथर्वाऋषिप्रोक्तम् तथा आदित्यहृदयस्तोत्रम्-अगस्त्योक्तम् ।

पुराणों में भगवान् सूर्य का बड़ा ही भव्य एवं रुचिकर वर्णन मिलता है । ये हमारे जीवन के सञ्चालक तथा शुभाशुभ कर्मों के द्रष्टा एवं आरोग्य प्रदाता हैं । इनकी आराधना, स्तुति तथा व्रतोपवास से असाध्य रोगों से मुक्ति मिलती है । ऐसा भी प्रमाण मिलता है कि सूर्य की स्तुति से कुष्ट व्याधि जैसे कठिन रोग से मुक्ति मिल जाती है । अतः सूर्योपासकों की सुविधा के लिए 'त्रैलोक्य मङ्गल सूर्यकवच' नामक स्तोत्रग्रन्थ में विविध छन्दों से अलंकृत स्तोत्रों का कमनीय संग्रह दिए गए हैं । ऐसा स्तोत्र अन्यत्र दुर्लभ है । मूल्य ०-५०

प्राप्तिस्थान—चौखम्भा ओरियन्टालिया, वाराणसी, दिल्ली